# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(Old)** | **प्रश्नपत्रम् – 8** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.E.3.5.10** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –17/10/2019 | सन्दर्भग्रन्थः – महाभाष्यम् - उणादि | |

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** **गुणाः**

**प्रश्न १ निम्नलिखितेषु कयोश्चिद् द्वयोः प्रश्नयोः समाधानं भाष्यरीत्या करणीयम्।** **१०**

१ अकारस्य विवृतोपदेशेन किं प्रयोजनम् इति भाष्योवतरीत्या व्याख्येयम् ।

२ अनुवृत्तिनिर्देशे सवर्णग्रहणं भवति न वा?
भवति चेद् तत्रापतितान्दोषान् निराकृत्य भाष्यकारमतेन सिद्धान्तः प्रतिपादनीयः।

३ लृकारोपदेशस्य किं प्रयोजनमिति शास्त्ररीत्या सम्यग् विविच्यताम् ।

**प्रश्न २ अधोलिखितयोः एकः समाधेयः।** **१०**

१ प्रत्याहारेषु हकारस्य वारद्वयमुपदेशे किं प्रयोजनम् इति प्रतिपादयत ।

२ प्रत्याहारेऽनुबन्धानां ग्रहणं भवति वा न इति भाष्यदृशा विशदं प्रतिपादयत ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितेषु कयोश्चिद् द्वयोः प्रश्नयोः समाधानं करणीयम् ।** **१०**

१ वृद्धिरादैच् इत्यत्र सम्दुदायस्यादैचः वृद्धिसंज्ञा निरासः भाष्यकार प्रदर्शितदिशा व्याख्येय ।

२ वृद्धिरादैच् इत्यत्र तपरकरणं किमर्थमिति साधकबाधकयुक्तिपुरस्सरं व्याख्येयम्।

३ वृद्धिरादैच् इत्यत्र चकारस्य ‘चोः कुः’ इत्यनेन कुत्वं कस्मान्न भवतीति भाष्यदृष्ट्याविस्तारेण व्याख्येयम्।

**प्रश्न ४ निम्नलिखितयोः विस्तारेण एकः समाधेयः।** **१०**

१ ‘इको गुणवृद्धी’ इति सूत्रे ग्रहणं प्रयोजनं विलिख्य षष्ठ्याः स्थाने .......... योगत्वाह इङ् निवृत्तिः इति वार्तिकाशया विवेचनीयः।

२ ‘इको गुणवृद्धी’ इति सूत्रे वृद्धिग्रहणं किमर्थमिति भाष्यमतेन विविच्यताम् ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।** **१०**

१ कृवापाजिमिस्वहि साध्यशूभ्य उण्।

२ दृसनिजनिचरिचटिभ्यो ञुण्।

३ वालमूललघ्वमङ्गुलीनां वा लौरत्वमापद्यते।

**प्रश्न ६ निम्नलिखितयोः एकः समाधेयः।** **१०**

**१ एतेषां प्रत्ययपूर्वकं संक्षेपेण रूपाणि साधयत ।**

१ पायुः २ साधुः ३ वटुः ४ कन्दुः
५ फल्गुः ६ गुरुः ७ तालुः ८ पशुः
९ पृथुः १० लिङ्गुः

**२ एतेषां विग्रहवाक्यं लिखत।**

१ कारुः २ जायुः ३ दारुः ४ भरुः
५ बाहुः ६ मृगयुः ७ भृगुः ८ क्रुरुः
९ परशुः १० शतद्रुः

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानाम् उत्तराणि लिखत।** **१०**

१ महाभाष्ये द्वितीयाह्निकस्य किं नाम?

२ महाभाष्ये द्वितीयाह्निके कति सूत्राणि व्याख्यातानि?

३ व्याकरणमहाभाष्यम् कस्य ग्रन्थस्य भाष्यं विद्यते?

४ ‘तुल्यास्यप्रयत्नं सवर्णम्’ इति सूत्रे आस्य ग्रहणं किमर्थः?

५ लृकारोपदेशस्य कति प्रयोजनानि ? कानि च?

६ के अयोगवाहाः सन्ति?

७ शब्दानां प्रवृत्तिः कतिधा?

८ हश् प्रत्याहारे हकारपाठस्य किं फलम्?

९ भाष्यकारेण तृतीयाह्निके कति सूत्राणि व्याख्यातानि? ‘

१० ‘वृद्धिरादैच्’ इत्यत्र संज्ञाशब्दः कः संज्ञीशब्दश्च कः?

११ अक्षरसमाम्नाये कति सूत्राणि सन्ति?

१२ ‘इको गुणवृद्धी’ इति सूत्रे इग्ग्रहणं किमर्थम्?

१३ साध्नोति परकार्यं इति साधुः इत्यत्र कः प्रत्ययः भवति?

१४ विधुः इत्यत्र सम्प्रसारणं केन सूत्रेण भवति?

१५ वायुः इत्यत्र युगागमः केन सूत्रेण भवति?